# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा-अक्टूबर-२०१९

| कक्षा -आचार्यद्वितीयवर्षम् (सत्रम्-३) | प्रश्नपत्रम् – ४ | गुणाः - ७० |
|---|---|---|
| विषयः - फलितज्योतिषम् | (C.C.- ५.३.९. New) | समयः -३.०० तः ६.०० |
| दिनाङ्कः - १२/१०/२०१९ | सन्दर्भग्रन्थः - बृहत्पाराशरहोराशास्त्रम्। | |

**प्रथमान्वितिः**

**प्रश्नः १ अधोलिखितयोः कस्यचित् एकस्य व्याख्या कार्या। ०५**

(क) दीप्तः स्वस्थः प्रमुदितः शान्तो दीनश्च दुःखितः।
विकलश्च खलः कोपी ग्रहावस्था नवोदिताः॥

(ख) भयातगुणितं खेटदशामानं भभोगहृत्।
भुक्तवर्षादिकं तस्य भोग्यं माने विशोधनात्॥

**प्रश्नः २ अधोलिखितयोः कस्यचिदेकस्योपरि निबन्धं लिखत। १०**

(क) विंशोत्तरीदशाविचारः।

(ख) अष्टोत्तरीदशाविचारः।

**द्वितीयान्वितिः**

**प्रश्नः ३ अधोलिखितयोः कस्यचित् एकस्य व्याख्या कार्या। ०५**

(क) दशेशे तु दशारम्भे तनौ सौम्ययुतेक्षिते।
स्वर्क्षतुङ्गसुहृद्भे वा शोभनं तद्दशाफलम्॥

(ख) षष्ठाष्टमेव्यये चन्द्रे दुर्वले पापसंयुते।
राजद्वेषो मनोदुःखं धनधान्यादिनाशनम्॥

**प्रश्नः ४ अधोलिखितयोः कस्यचिदेकस्योपरि निबन्धं लिखत। १०**

(क) सूर्यमहादशाफलम्।

(ख) शुभाशुभशनिदशाफलम्।

**तृतीयान्वितिः**

**प्रश्नः ५ अधोलिखितयोः कस्यचित् एकस्य व्याख्या कार्या। ०५**

(क) अष्टमे वा व्यये राहौ पापयुक्तेऽथ वीक्षिते।
चौराहिव्रणभीतिश्च चतुष्पाज्जीवनाशनम्॥

(ख) कुजस्यान्तर्गते सौम्ये लग्नात् केन्द्रत्रिकोणगे।
सत्कथाश्चाजपादानं धर्मवृद्धिर्महायशः॥

**प्रश्नः ६ अधोलिखितयोः कस्यचिदेकस्योपरि निबन्धं लिखत। १०**

(क) भौमदशाफलविचारः।

(ख) बुधदशाफलविचारः।

## चतुर्थान्वितिः

**प्रश्नः ७ अधोलिखितयोः कस्यचित् एकस्य व्याख्या कार्या । ०५**

(क) अन्तर्दशादिनाद्यं यत् स्वस्वाब्दैर्निहतं हृतम् ।
विंशोत्तरशतेनाप्तं प्रत्यन्तर-दिनादिकम् ॥

(ख) सुहृदन्तर्दशा भव्या विरुद्धा शत्रुसम्भवा ।
मध्यमा मध्यखेटस्य दशादीनामयं क्रमः ॥

**प्रश्नः ८ अधोलिखितयोः कस्यचिदेकस्योपरि निबन्धं लिखत । १०**

(क) सूक्ष्मदशासाधनम् ।

(ख) सूर्यस्य सूक्ष्मदशाफलम् ।

## संयुक्तान्वितिः

**प्रश्नः ९ अधोलिखितेषु केषाञ्चित् दशप्रश्नानामतिलघूत्तराणि लिखन्तु । १०**

(१) कति संख्यकाः ग्रहाणां दीप्ताद्यवस्थाः भवन्ति ?

(२) कति संख्यकाः शयनाद्यवस्थाः भवन्ति ?

(३) विंशोत्तरीदशायां सम्पूर्णदशावर्षमानं लिखत ।

(४) अष्टोत्तरीदशायां सम्पूर्णदशावर्षमानं लिखत ।

(५) विंशोत्तरीदशायां शनेः दशावर्षमानं लिखत ।

(६) सूर्यस्य विंशोत्तरिमहादशायां चन्द्रस्य अन्तर्दशायाः वर्षादिमानं लिखत ।

(७) अष्टोत्तरीदशायां चन्द्रस्य महादशामानं लिखत ।

(८) अष्टोत्तरीदशायां कति ग्रहाणां दशामानं भवति ?

(९) अष्टोत्तरीदशायां कस्य ग्रहस्य दशामानं न भवति ?

(१०) विंशोत्तरीदशायां नवग्रहाणां दशाक्रमः लिखत ।

(११) षोडशोत्तरीदशायां सूर्यस्य दशामानं लिखत ।

(१२) द्वादशोत्तरीदशायां सूर्यस्य दशामानं लिखत ।

(१३) यदा जातकस्य जन्मनक्षत्रः रोहिणी स्यात्तदा कस्य ग्रहस्य विंशोत्तरी दशा भविष्यति ?

(१४) यदा जातकस्य जन्मनक्षत्रः आर्द्रा स्यात्तदा कस्य ग्रहस्य अष्टोत्तरी दशा भविष्यति ?

(१५) दशेशः इत्यस्य कोऽर्थः ?

----oooo----